This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M ૨૬૬ विषय પૂજાવિધી
नाव. સર્વતોભદ્ર મંડળે સ્થાપન પૂજન
लेखक/लिपीकार –
पृष्ठ 13 काळ સંવત ૧૯૩૫ पूर्ण/~~अपूर्ण~~

Checked 2012

१

॥श्रीगणेशायनमः विलिखेत्सर्वतोभद्रंवेदि
कोपरिशोभितं॥ तीर्यगूर्द्धगतारेखाः कुर्यादेको
नविंशति॥१॥ खंडेंदुत्रिपदाकोणे श्रृंखलापं
चकोष्ठकैः एकादशपदावल्लीभद्रंतुनवभिः
पदैः २ चतुर्विंशत्पदावापीपरिधिर्विंशतिःपदैः
मध्येषोडशभिःकोष्ठैःपद्ममष्टदलंलिखेत्॥३॥
सितेंदुश्रृंखलाकृष्णावल्लीनीलेनपूरिताभ
द्राऽरुणासितावाप्यःपरिधिःपीतवर्णकः॥४॥
वाह्येंतरदलैःश्वेता कर्णिकापीतवर्णका॥

खंडेंदुश्रृंखलावापीवल्लीभद्रंतुपंचकं॥५॥
परिधावेष्टितंपद्मंवाह्येसत्वरजस्तमैः सर्व
तंत्रसमुद्दिष्टंसर्वतोभद्रमंडलं॥६॥ मध्येब्रह्मा
ष्टासुदिक्षुसोमादिदेवतास्मृताः वायुसोमद्व
योर्मध्येवसूवोष्टौस्थितश्चभाः॥७॥ सोमईशा
नयोर्मध्येरुद्रएकादशस्मृता इशानइंद्रयोर्म
ध्येआदित्यानूद्वादश [illegible] स्मृता॥८॥
इंद्राग्निमध्येचतथाह्यश्विनौचप्रपूजयेत्
आग्नेययमयोर्मध्येविश्वेदेवाःसपैत्रिकाः याम्या
नैरृत्ययोर्मध्येसप्तर्षयश्चकारयेत् वारुणवा
यव्ययोर्मध्येगंधर्वाप्सरसस्तथाब्रेहिसोमवयो

२

मध्येरुद्रास्तथैव कारयेत् स्कंदनंदीश्वरंशूलं म
महादेवं प्रपल्लतौ ब्रह्मेशानादि कयोर्मध्ये दक्षादिस
को [illegible] गणः ब्रह्म[illegible]डेयस्तथामध्ये
दुर्गाविष्णुस्तथैवच १३ ब्रह्माग्निमध्येच तथास्व
धां देविप्रपूजयेत्। ब्रह्मायाम्य कयोर्मध्ये मरुतः
सप्तवेकुरुः ब्रह्मणः पादमूले तु मेदिनीं तत्र का
रयेत् कावेरीनर्मदा चैव यमुना च सरस्वती १४
गंगाकृष्णातिप्रागोदापूज्यामध्येससागराः ।।१।।
द्वीसंज्ञास्तेसुनीरैक्षुदधिसागरएव चैवं ब्रह्मपदा
नमिसाद्यैः मंत्रैस्तत्रस्थदेवताः गंधपुष्पादिभिः
पूज्यादद्याद्दीपांश्च सर्वतः सर्वत्रभद्रंयस्मात्तस्मात्

१५

।।

सर्वतोभद्रमीरितं ।। इति सर्वतोभद्रस्थापनं ।। गण
नांत्वेति मंत्रेण आग्नेय्यां गणपतिं न्यसेत् गणनांत्वेति
मंत्रस्य प्रजापतिर्ऋषिरनुष्टुप्छंदो गणपतिर्देवता
गणेशपूजने विनियोगः गणनांत्वा गणपतिं ह
वामहे प्रियाणांत्वा प्रियपतिं हवामहे निधीनां
त्वां निधिपतिं हवामहे वसो मम आहमजानि गर्भ
धमात्वमजासि गर्भधं ।।१।। श्रीश्चतेति मंत्रेण ईशा
न्यां अंबिकां न्यसेत् ।। श्रीश्चतेति नारायण ऋषिः
त्रिष्टुप्छंदो दुर्गा देवता दुर्गापूजने विनियोगः
श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि
रूपमश्विनौ व्यात्तं इष्णन्निषाणमुम्मइषाणस

3 र्वंलोकमाईषाण॥३॥ मध्यस्थाने स्थितो ब्रह्मा
आब्रह्मंनिति पूजयेत्॥ आब्रह्मंनिति प्रजापति
ऋषिः जगुः छंदः प्रजापतिर्देवता ब्रह्मपूजनेवि
नियोगः आब्रह्मण्ब्राह्मणो ब्रह्मवर्चसी जाय
तामाराष्ट्रे राजन्यः सुरैः खषोति व्याधिमहार
थो जायतां दोग्ध्री धेनुर्वोढा नड्वाना[illegible]सुः
सप्तिपुरंधिर्जोरवाजिष्णूरथेष्ठासधेयोजुवा
स्यजजमाणस्य वीरोजायतां निकामेनिकामेन
पर्जन्यो वर्षतु फलवत्योनवोषधयः पच्यतां
योगक्षेमोनः कल्पतां॥३॥ सोमंचैवांतरे भागे
ववꣳ सोमेति पूजयेत् वयꣳ सोमेति वसुऋषिः

॥१

गायत्रीछंदो सोमदेवता सोमपूजनेविनियोगः वय
ꣳ सोमव्रतेतवमनुस्तनूषविभ्रुतः प्रजावंतसचे
महि॥४॥ ईशान्यांदिशि ईशानंतमीशानेति पूजयेत्
तमीशानमंत्रस्य गोतमऋषिः त्रिषुप्छंदः इंद्रोदेवता
ईशानपूजनेविनियोगः तमीशानं जगतस्तस्थु
षस्पतिंधियंजिन्वमवसेहूमहेवयं पूषानोयथा
वेदसांमसद्वधेरक्षितापायुरदब्धः स्वस्तये॥५॥
पूर्वस्यादिशिइंद्रं त्रातारमिति पूजयेत्॥ त्राता
रमितिगर्गऋषिःत्रिष्टुप्छंदः इंद्रोदेवता इंद्रपूज
नेविनियोगः त्रातारमिंद्रमवितारमिंद्रꣳ हवे
हवेसुहवꣳ शूरमिंद्रं ह्वयामिशक्रंपुरुहूतमिं

इ ꣳ स्वस्तिनोमघवाधात्विंद्रः ६॥ पूर्वदक्षिणयोर्म
ध्येअग्निं त्वंन इतिपूजयेत्। त्वंनोअग्ने इतिहिरण
यस्तूपऋषिः स्त्रिष्टुप्छंदः अग्निर्देवता अग्निपूज
नेविनियोगः त्वंनोअग्नेवरुणस्यविद्वान्देवस्य
हेडोअवयासिसीष्ठाः जजिष्ठोवह्नितमः सोसुचा
नोविश्वांद्वेषाꣳसिप्रमुमुग्ध्यस्मत्॥७॥ याम्यसु
गन्नपंथेतिधर्मराजपूजयेत्। सुगन्नपंथेतिप्रजा
पतिऋषिस्त्रिष्टुप्छंदोयमोदेवतायमपूजनेविनियोगः
सुगंन्नोपंथामभयंकृणोतुयास्मिन्नक्षत्रेयमयेति
ने
राजाजस्मिँणमभ्यस्यचित्रंहविषाजयामाप्यंचवं
तिदेवा॥८॥ असुंन्वंनेतिमंत्रेणनैऋत्येनिऋति

यजेत्। असुंन्वंत्वेतिविनस्वानूऋषिः त्रिष्टुप्छं
दोनिर्ऋतिदेवतानिऋतिपूजनेविनियोगः असुं
न्वतमयजमानमिच्छस्तेनसेत्यामन्विहितस्करस्या
अन्यमस्मदिच्छसात् इत्यानमोदेविनिर्ऋतेतुभ्य
मस्तु ९॥ प्रतीच्यांवरुणंदेवतत्वाजामितिपूजयेत्
तत्वायामितिसुनःशेफऋषिः त्रिष्टुप्छंदोवरुणो
देवतावरुणपूजनेविनियोगः तत्वायामिब्रह्म
णावंदमानस्तदाशास्तेययमानोहविर्भिः अहेड
मानोवरुणेहबोधिरुसꣳसमानआयुः प्रमोषी
१०॥ अनोनियुद्भिर्मंत्रेणवायव्यांवायुमर्चयेत्॥
आनोनियुद्भिरितिप्रजापतिऋषिस्त्रिष्टुप्छंदोवा

५

युर्देवता वायुपूजने विनियोगः आ नो नियुद्भिः
शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञं वा
यो अस्मिन्सवने मादयस्व यूयं पात स्वस्तिभिः स
दा नः ॥११॥ वायुसोमद्वयोर्मध्ये वसवोऽष्टौ प्रपूजयेत्
ध्रुवो ध्रुवश्च सोमश्च आपश्चैवानलोऽनिलः प्रत्यूष
श्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः वसोः पवित्र
मंत्रेण धरादींश्च प्रपूजयेत् । वसोः पवित्रेति गौ
तमऋषिः जगतीछंदो वसवो देवता वसुपूजने
विनियोगः वसोः पवित्रमसि द्यौरसि पृथिव्यसि
मातरिश्वनो घर्मोसि विश्वधा असि परमेण धा

।।।।

म्नादृंहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ॥१२॥ सो
मईशानयोर्मध्ये रुद्राणेकादश स्मृता ॥ अजैकपा
दहिर्बुध्न्यो विरूपाक्षोऽथ रैवत हरश्च बहुरूपश्च हु
त्र्यंबकश्च सुरेश्वरः सावित्रश्च जयंतश्च पिनाकी
रुद्रा एवं च ॥ नमस्ते रुद्र मंत्रेण रुद्रांश्चैव प्रपूजये
त् । नमस्त इति मंत्रस्य परमेष्ठिऋषिः गायत्रीछंदो रुद्रो
देवता रुद्रपूजने विनियोगः नमस्ते रुद्र मन्यव उतोत इ
षवे नमः बाहुभ्यामुत ते नमः ॥१३॥ ईशानइंद्रयोर्म
ध्ये आदित्या द्वादशैव तु धाता मित्रोऽर्यमा रुद्रो वरुणः
सूर्य एव च भगो विवस्वान्पूषा च सविता दशमः
स्मृतः एकादशस्त्वष्टा विष्णुर्द्वादश उच्यते

रि

६ आदित्ति प्रजापतिऋषिः त्रिष्टुप्छंदः सूर्योदेवता
सूर्यपूजने विनियोगः अदितिद्यौरदित्तिरिंतमा
।दितिर्म्माता सपिता सपुत्रः। विश्वेदेवा अदितिप
ञ्चयना आदितिर्यात्तमदित्तिर्यानित्वं॥१४॥ इंद्रआ
ग्नेयोर्मध्ये आश्विनौ देवौ अश्विना तेजसा चक्षुः
प्राणेन सरस्वती वीर्यं वाचेंद्रो बलेनेंद्राय दधुरि
द्रियं॥१५॥ अग्नेययमयोर्मध्ये विश्वेदेवाः सपे
त्नकाः क्रतुदक्षौ वसुः सत्यकालकामौ धूरलो
चनौ पुरूरवौ माद्रवसौ विश्वेदेवा इमे दश॥
अग्निष्वात्ता सोमपाश्च बर्हिषदः सुकालकाः
एकश्रृंगोस्त्र धर्मेति द्वितीयः सोमपास्त पावि

॥॥॥ ६

श्वेदेवास आगतानान्सांप्रपूजयेत्। विश्वेदेवास
आगतेति परमेष्ठी ऋषिर्गायत्री छंदो विश्वेदेवादे
वता विश्वेदेवापूजने विनियोगः विश्वेदेवास आ
गत्ताशृणुतामइमं हवं एदंबर्हिर्निषीदत्त
१६॥ आयंतुनः पित्तर इत्ति विवस्वानऋषिर्बृहती
छंदः पितरो देवताः पितृपूजने विनियोगः आ
यंतुनः पितरः सोम्यासो अग्निष्वात्ताः पथिभिर्दे
वयानैः अस्मिन्यज्ञे स्वधया मदंतोधिब्रुवंतुते
वंत्वस्मान्॥१७॥ यमनैऋत्ययोर्मध्ये सप्तऋषीन्
प्रपूजयेत्॥ कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथगो
तमः जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः
सप्तऋषय इति गोतमऋषिर्जगतीछंदो सप्तऋषयो

देवता सप्तऋषिपूजने विनियोगः सप्तऋषयः
प्रतिष्ठिताः शरीरे सप्त रक्षंति सदमप्रमादं
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्व
प्नजौ सत्रसदौ च देवौ ॥१८॥ नैरृत्य वरुणयोर्मध्ये ना
गान्भूतानि पूजयेत् ॥ अनंतो वासुकी शेषः कर्को
टकस्तक्षकस्तथा पद्मकश्च महापद्मः शंखकं
बल एव च पिशाचो गुलिकः सिद्धा भूतामी देवयो
नयः भूताय त्वाप नमोस्तु सर्पेभ्यः भूतायत्वे
ति पाराशर ऋषिः विराट् छंदो नारायणो देवता
भूतपूजने विनियोगः भूताय त्वा नारातये स्व
र्भिवेवषलं दृंता दुर्य्याः पृथिव्यामुर्वंतरिक्ष
मन्वेमि पृथिव्यास्त्वा नाभौ सादयामिदित्या उपस्थे

ग्नेः हव्यं रक्षा ॥१९॥ नमोस्तु सर्पेभ्य इति प्रजापति
ऋषिरनुष्टुप्छंदो सर्पो देवता सर्पपूजने विनियोगः
नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु ये अंतरिक्षे ये दि
वि तेभ्यः सर्पेभ्यो नमः ॥२०॥ वायुवरुणयोर्मध्ये गंध
र्वाप्सरसः प्रपूजयेत् ॥ विश्वावसुश्च गंधर्वो हा
हा हूहूस्तथैव च घृताची मेनका रंभा उर्वशी च
तिलोत्तमा सुकेशी मंजुघोषाद्याः कथ्यंतेऽप्सरसो
बुधैः अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्स
श्च रथौजाश्च सेनानीग्रामणौ पुंजिकस्थला च क्र
तुस्थला चाप्सरसौ दंक्ष्णवः पशवो हेतिः
पौरुषेयो वधः प्रहेतिस्तेभ्यो नमः अस्तु ते नो

८

वन्वेनोमद्रुयंतुतेयं द्विष्मोयश्चनोद्वेष्टि तमेषा
ज्जुंभेदध्मः २१॥ गंधर्वस्त्वेतिगोतमऋषिर्द्विपदावि
राट्छंदः गंधर्वोदेवतागंधर्वपूजनेविनियोगः
गंधर्वस्त्वाविश्वावसुः परिधात्तुविश्वस्यारिष्टै
यजमानस्यपरिधिरस्यग्निरिडईडितः इंद्रस्य
बाहुरसिदक्षिणोविश्वस्यारिष्टैयजमानस्यपरि
धिरस्यग्निरिडईडिततः मित्रावरुणौत्वा तर्त्तः उप
रिधत्तांध्रुवेणधर्मणाविश्वस्यारिष्टैः यजमान
स्यपरिधिरस्याग्निरिडिइडिततः २२॥ ब्रह्मसाम
थयोमध्येअवरुद्धेति परमेष्ठीऋषिः कुकुप्छंदो

रुद्रोदेवतारुद्रपूजनेविनियोगः अवरुद्रमदीम
ह्यवदेवं त्र्यंबकंयथावस्यस्स्करद्यथा नश्रेय
सस्करद्यथानोव्यवसाययात् भेषजमसिभेषजं
गावेश्वायपुरुषायभेषजंसुखंमेषायमेष्यै ॥२३
ब्रह्मरुद्रानयोर्मध्ये श्रीविष्णुंचप्रपूजयेत् । सद
स्पतिविष्णोरराटमितिसदस्पतिनारायणऋषिः
उष्णिक्छंदो लक्ष्मीदेवतालक्ष्मीपूजनेविनियोगः
विष्णोकर्म्माणिपश्यस्पतोव्रतानिपस्पसेइंद्रस्य
युज्यःसखा ।२४॥ विष्णोरराटइतिप्रजापतिऋषिः
अनुष्टुप्छंदोविष्णुदेवताविष्णुपूजनेविनियोगः
विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसि

२

विष्णो ध्रुवोसि वैष्णवमसि विष्णवे त्वा ॥२५॥
ब्रह्मेंद्रयोर्मध्ये मरुतां सप्तको गणः। शुक्र
ज्योतिश्चेति स्नुवाकेन बद्रूऋषिः मरुद्गणसप्तकं
च स्वैर्दैवैरिति पूजयेत्। स्वैर्दैवैर्दत्तापित्तेद्र सो
द्रदेवानां ँ सुम्नैर्वर्द्धतेरण्यायित्ते वैधिनवा
आसुसेवा स्वावेशात न्नास्त्र न्विसरवा ष्विवुनाध्व
र्जूसादयितमिद्र त्वा ॥२७॥ ब्रह्माग्नेययोर्मध्ये
स्वधा तत्रैव पूजयेत्। अग्ने वाजजिदिति मधुच्छं
दो ऋषिर्बृहती छंदो वैश्वानरो देवता स्वधा पूज
ने विनियोगः। अग्ने वाजजिद्वाजं त्वा सरिष्यंतिं वा

२

जजितं ँ सम्मार्ज्मी ॥२८॥ ब्रह्मायमयोर्मध्ये अन्नवा
यो हूमासेति ऋं कुत्स ऋषिः जगती छंदो म्नसुदेवता
म्नसुपूजने विनियोगः। अन्नवायो द्वै मासानामन्नसो
मयूरः स्कपर्णस्ते गंधर्वाणं अपामस्मु जो मां नू ऋस्य सा
वोरोहितं कुंडिण्णची नो नतिकारे स्पर सामूमस वे
सितः ॥२९॥ ककुभं रूपमिति प्रजापतिऋषिः अनु
ष्टुप्छंदो सोमो देवता सोमपूजने विनियोगः। ककुभं
ँ रूपं वृषभस्य रोचते बृहच्छुक्रः शुक्रस्य पुरोगाः सो
मः सोमस्य पुरोगाः। यत्ते सोमदाभ्यं नाम जागृवि तस्मै
ते सोमपा स्वाहा ॥३०॥ ब्रह्मनैर्ऋत्ययोर्मध्ये वरुणवि
ष्णू च पूजयेत्। गणानां त्वेति प्रजापतिऋषिरनुष्टुप्

१०

छंदो गणपतिदेवता गणपतिपूजने विनियोगः
गणानांत्वेति ॥ ३ ॥ ब्रह्मवरुणयोर्मध्ये आप
स्थानं विधीयते। आपोहिष्ठेति मंत्रेण अपांचै
वत्र पूजयेत् आपोहिष्ठेति त्रिदृच सूक्तं पंगिरस ऋ
षिः त्रिष्टुप् छंदः आपो देवता अप् पूजने विनि
योगः आपोहिष्ठा मयोभुवः स्तान ऊर्जेदधातुनः
महेरणाय चक्षसे यो वः शिवतमो रस तस्यभा
जयते हनः उशतीरिव मातरः तस्मा अरंगमाम वः
यस्यक्षयाय यिन्वथ आपोजनयथा च नः ॥ ४ ॥ ब्र
ह्मवायव्ययोर्मध्ये मरुतां सप्तकोणः समीरमारु
तू मरुत् जगत्प्राण समीरणः इमे च सप्त मरुतो

मातरिश्वा तथानिलः इहदिंद्राय मंत्रेण पूजास्ते
तेहि वायवः इहदिंद्रायेति परमेष्ठी प्रजापतिऋ
षिर्बृहतीछंदो मरुतो देवता मरुता पूजने वि
नियोगः इहदिंद्राय गायंत मरुतो ब्रह्मार्वेता
वृत्रं हनति वृत्रहा शतक्रतुः स्ववज्रेण शतप
र्वणा ५ ॥ ब्रह्मणं पादमूले तु मेदनी तत्र पूजयेत्
मंहिद्यौरिति मंत्रेण पृथ्वी पूजा प्रयत्नतः महीद्यौ
रिति मेधातिथि ऋषिर्गायत्री छंदः पृथ्वी देवता
पृथ्वी पूजने विनियोगः महीद्यौः पृथिवी
चन इमंयज्ञम्मिमक्षतां पिपृता नो भारीमभिर्न
दीस्पयोंजिष्ठ इति मंत्रेण नद्य पूजा स्तपोतरे गंगा

३३ चयमुनाचैवनर्मदाशतद्रूचसरस्वतीकौशिकीचित्राव
तीचैवगोदारेवापयोष्णिकाकृष्णाभीमरथीतुंग
गभद्राकाकुद्मनदीतथा॥नदीभ्यः इतिमंत्रेणपू श्री
ज्याचोत्तरतस्वनू: नदीभ्यः इतिपरमेष्ठप्रजापति
ऋषियजुः छंदोनद्योदेवतानदीपूजनेविनियोगः
नदीभ्यः पौंजिष्ठमुद्दीकाभ्योनेबादम्पुरुषध्यायदु
र्मेडुंधर्वाश्मारोभ्यश्चसर्व्वपुण्यउन्मत ॐ सर्प्पदि
वजनोभ्योप्प्रतिपादमयेभ्यः कितवम्मीर्यताया
भ्यकिंताम्पिम्माचेभ्योविदनकारीयातुधानेभ्यः
कराटकीकारीमू॥३५॥सवनोद्दुडसुरासप्पिदधि
क्षीरंसुजीवनंसमुद्रोसिनभस्वान्मंत्रेणानेनपू

जयेत्॥समुद्रोसिमितिप्रजापतिऋषिर्यजुः छंदप्र
जापतिर्देवतासमुद्रपूजनेविनियोगः समुद्रोसिन
भस्वानार्द्रदानुः शंभूर्मयोभूरभिमावाहिस्वाहा
मारुतोसिमरुतांगणः शंभूर्मयोभूरभिमावाहि
स्वाहावस्यूरसिदुवस्वा ॐ भूर्मयोभूरभिमावा
हिस्वाहा॥३४॥आदित्यश्चंद्रमाभौमोबुधजीवसि
ताऽर्कजः सर्वेग्रहास्तु संपूज्याः शाकेनत्क्रमेणच
अग्निंदूतमितिमेधातिथिऋषिः गायत्रीछंदः सवि
तादेवतासवितापूजनेविनियोगः अग्निंदूतंपु
रोदधेहव्यवाहमुपब्रुवेदेवा२॥आसादयादिहा ३५
अप्स्वग्निरितिवामदेवऋषिः गायत्रीछंदः सोमा

१२ देवतासोमपूजनेविनियोगः अप्स्वग्नेसधिष्टव
सौषधीरनुरुध्यसेगर्भेसंजायसेपुनः ३७ सोमाप्या
प्यिवीतिदध्यंगाँ पर्वण ऋषिर्गायत्रिछंदो सौमोदे
वतासौमपूजनेविनियोगः सोमाप्यिनोमवानू
हेराविबेस्रानियत्तानः सर्मसप्रपा ॥३८॥ इदं
विष्णुरितिमेधादित्तिऋषिर्गायत्रीछंदोबुधोदे
वताबुधपूजनेविनियोगः इदंविष्णुर्विचक्रमे
त्रिधानिदधेपदंसमूढस्यपांसुरेस्वाहा ३९॥
महांइतिहिरण्यगर्भऋषिर्गायत्रीछंदो बृहस्प
तिदेवता बृहस्पतिपूजनेविनियोगः महांव
ज्रहस्ताषोडशीसर्मयत्ततु हंतुपापमानंयोस्मा
१२

न्द्वेष्टि उपयामग्रहीतोसिमहेंद्रायत्वैषतेयोनिर्महें
द्रायत्वा ४० शुक्रज्योतिश्चेतिवामदेवऋषिः उष्णि
कूछंदः शुक्रोदेवतापूजनेविनियोगः शुक्रज्योति
श्चाचित्रज्योतिश्चज्योतिषमांचाशुक्रश्चऋतपाश्चात्य
ंहः स्वाहा ॥४१ प्रजापतिर्हिरण्यगर्भऋषिः त्रिष्टुप्
छंदः अग्निर्देवता अग्निपूजनेविनियोगः प्रजापते
नत्वदेतान्यन्योविश्वारूपाणिपरितावभूवायत्का
मास्तेजुहुमस्तन्नोअस्तुवयंस्यामयतयोरयि
णाः स्वाहा ४२ आयंगौरितिसर्पराज्ञोऋषिर्गा
यत्रीछंदोराहुदेवताराहूपूजनेविनियोगः आ
यंगौः प्रश्नीरक्रमादसदनमातरम्पुनःपितरश्च
प्रयत्स्वः ४३ ब्रह्मयज्ञानमितिप्रजापतिऋषिस्त्रिष्टु

६३

हुँ पूछंदः केतुर्देवता केतुपूजने विनियोगः ब्रह्मय
ज्ञानस्वरूपमं पुरस्ताद्विरुगीमतः रुरुचो वेन आवः स
बुध्याउपमा अस्यविष्टाः सतश्चयोनि मसतश्चविवः
॥४४॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही
चैव माहेंद्री चामुंडा सप्तमातरः समस्ता देव्याध्रियासं
दक्षिण्यान्तु च सामाच आयुः प्रमेवीमंहित्तक्वीराम्बि
देवतदेव विसंदसे ॥४५॥ इति मंत्रेण पूजनं मंड
ल बाह्ये वज्र शक्ति दंड षड्ग पाशांकुश गदा त्रि
शूल पद्म चक्राणां पूजनं ॥ इतिश्री सर्वतोभद्र
मंडलस्थापनं पूजनं समाप्तं ॥ लीखितं वलदेव
संवत् १८३५ का मिति जेष्ठ कृष्ण ६ बुध वारः

१३

```
[OrderDescription]
,CREATED=16.09.19 12:19
,TRANSFERRED=2019/09/16 at 12:23:48
,PAGES=14
,TYPE=STD
,NAME=S0001815
,Book Name=M-266-SARVTOBHADRA MANDAL STHAPAN PUJAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,
```